# आदर्श-प्रश्नपत्रम् (भाषाप्रवेशः - 2)

**अङ्काः - 100**

**समयः - 120 mins**

भाषाप्रवेशपुस्तकस्य द्वितीयभागस्य परीक्षायां कीदृशाः प्रश्नाः भविष्यन्ति इति बोधयितुम् एतद् आदर्श-प्रश्नपत्रं विद्यते। प्रश्नाः तु निम्नरूपेण भवितुम् अर्हन्ति -

1. **अधस्तनधातुरूपाणां लृट्-लोट्लकारयोः रूपाणि लिखन्तु -**

   **वर्तध्वे, क्रीणते प्रतिष्ठे**

2. **अधोलिखितेषु धातुषु के सकर्मकाः, के च अकर्मकाः? इति चित्वा तान् प्रयुज्य लघुवाक्यानि निर्मान्तु -**

3. **निम्नवाक्यानि बहुवचनान्ततया लिखन्तु-**

   **अहं वन्दे।**

   **त्वम् असहथाः।**

   **सः अमन्यत।**

4. **आत्मनेपदिनः धातून् प्रयुज्य स्वीयाः आगामियोजनाः दशभिः वाक्यैः बोधयन्तु -**

5. **विशेष्यानुसारं विशेषणानां तथा च विशेषणानुसारं विशेष्याणां**

रूपाणि लिखन्तु-

यथा- (द्वे) नामन् (अनेक) आशीर्भिः

6. निम्नलिखितवाक्यानि कर्मणि/भावेप्रयोगे परिवर्तयन्तु -

क. छात्रः पठितपाठं चिन्तयन् लिखति।

ख. कार्यक्रमे नृत्यमाने नर्तक्यौ आवाम् अपश्याव।

ग. यन्त्रं चलति।

7. निम्नलिखितेषु शुद्धवाक्यानि चिन्वन्तु-

क. चोराः अनुधावद्भ्यां आरक्षकेभ्यः बिभ्यति।

ख. अग्रजः हसते बालकाय मोदकं ददाति।

ग. डयमानं विमानं दृष्ट्वा बालकाः मोदन्ते।

8. अधोलिखितानि वाक्यानि कर्मणि भावे वा परिवर्तयन्तु।

क. शिशुःरोदिति।

ख. शुनकाः भाषन्ति।

ग. सूचनाः पठन्तु।

9. निम्नलिखितानां संख्यानां त्रिषु लिङ्गेषु पूरणप्रत्ययान्तानि रूपाणि विलिख्य, तेषु कांश्चन उपयुज्य पञ्च वाक्यानि लिखन्तु-

यथा - 2, 5, 8, 10

10. लृङ्-लकारस्य प्रयोगेण वाक्यानि निर्मान्तु-

11. भवतां गृहे कश्चन उत्सवः आयोज्यमानः विद्यते, तत्र कः कः किं किं कुर्यात् इति भवतः योजनां विधिलिङ्-प्रयोगमाध्यमेन दशभिः वाक्यैः बोधयन्तु -